अथशांकरीप्रारंभः ॥ ॐ

श्रीकाशीविश्वनाथपुरीमेंमहल्लाछोटकीपियरीपरबाबूकौलेश्वरसिंहकेमकानमेंबाबूकिसुनद
यालसिंहकेगणेशप्रभाकरछा पाखानेमेंशंकरीछापीग
इजिसेलेनाहोयउसचौकमेंन ईसडकपरबाबूकौलेश्व
रसिंहकेदुकानपरमिलेगाशोधावासशास्त्रीप्रभुणेनेलिखाहरिनंदनछापनेवालागोपाल॥

॥ श्रीगणेशाय नमः ॥ आहुरिति । यद्यपि परिभाषादेशे विधिसूत्राणामुपस्थितौ गुणभेदकल्पनेन पदैकवाक्यतां नान्य-
थाइको यणचीत्यादौ तत्तद्विधीनां व्यवहिताव्यवहितसाधारण्यप्रवृत्तौ पश्चात्परिभाषैकवाक्यतायामपि जातानिवृत्त्य-
योगात् । भुक्तवंतं प्रतीति न्यायविरोधापत्तेश्च । प्राचीनोक्तवाक्यैकवाक्यतनाकर्तुमशक्या । संज्ञाशास्त्राणां तु मृजेर्वृद्धिरित्या-
दौ वृद्धिपदश्रुत्योपस्थितवृद्धिरादैजित्यस्य तदर्थज्ञानाय वृद्धिपदाभिन्ना आदैच इति बोधे मृजेरिकस्थाने वृद्धिपदाभि-
न्ना आदैचो भवंतीत्येतावतैव वाक्यैकवाक्यतया व्यवहार इति नोक्तदोषस्तत्रैव वृद्धिपदानर्थक्यं तु नोपस्थापकतयाचा-
रितार्थ्यात् तथापि उक्तषष्ठीस्थान इति सूत्रभाष्यं तु प्राचीनैर्लोपयितुं शक्यं तथा हि कार्यकालपक्षे प्रदेशैकवाक्यत-
यास्वबुद्धिजननवशाद्यथोद्देशेपि स्वदेशे वाक्यार्थस्य सत्त्वेन तत्तदर्थोपस्थित्यैव सर्वप्रकाशकत्वस्य संज्ञाशास्त्रव-
त्सत्त्वात् । किंच भाष्ये एकादेशस्थत्वमनुपपन्नं । यथा व्यवहर्तॄणां तत्तद्देशगमनेन तत्तद्देशीयत्वव्यवहाराभावे-
पि तस्य भावार्थकप्रत्ययान्तत्वात् तद्देशस्थत्वव्यवहारस्य दुर्वारत्वेन तत्रत्वेन तद्व्यक्तेनेपि सत्त्वादेवं च दृष्टान्तदा-
र्ष्टान्तिकयोर्वैषम्यं स्पष्टमेव । परं च परिभाषाणामुभयपक्षेपि पदैकवाक्यता लाघवादादृतेत्यासंज्ञाशास्त्रा-
णां तु यद्यपि च्व्यदसोमादिति सूत्रभाष्यप्रामाण्यात्कार्यकालपक्षे प्रदेशएकवाक्यार्थबोधस्तत्रत्यपरत्वेन पूर्व

त्वेन चाप्रतिषेधप्रसक्तिः। पूर्वत्रासिद्धमित्यस्य च प्रवृत्तिरिति लभ्यते। तथाहि मुत्वासिद्धत्वान्न कृतिभावो न प्राप्नो
तीत्याशंक्य सामर्थ्यात्तद्भाव इत्युक्त्वा अणोऽप्रगृह्यस्येत्येनत्वतिबंधेन कार्यकालपक्षे सार्थकमिति संखंड्य
एवं तर्हि यद्येतावत्प्रयोजनं स्यात्तर्ह्येवायं ब्रूयाद्दणोऽप्रगृह्यस्यादसो मेत्युत्क्रमग्रेपि मुत्वाद्यसिद्धत्वादयादीनां प्रा
प्तिमुद्भाव्य परैवं प्रगृह्यसंज्ञेति समाहितं तथापि न तद्युक्तिमत्। तस्मिन्निति सूत्रस्थन्यायसिद्धं भाष्यस्वारस्येन तं न्य
क्षेपि पाठकृतं परत्वस्यैव तत्रापि लाभात्। पूर्वपदार्थोपस्थितौ वाक्यार्थबोधे प्रतिबंधकाभावाच्च। संज्ञाप
रिभाषयोरैकरूप्यलाभे वैरूप्यकल्पनस्यायुक्तत्वाच्च। विरोधस्य कार्यज्ञानाधीनत्वेन सार्वधातुकार्धधा
तुकयोरित्यत्र गुणपदश्रुत्यपेक्षया लिंगस्य दुर्बलत्वेन न तन्निमित्तेषा इकः परिभाषापदैकवाक्यतान्वयवत्सं
तरंगस्यान षष्ठीत्वनिर्णायोपस्थितालोत्परिभाषावाक्यैकवाक्यतान्वये न बहिरंगासेनित्वदीयशब्दर
त्वासंगतेश्च। अंतरंगपरिभाषाया अपि विरोधे सत्येव प्रवृत्तिः। तज्ज्ञानस्य न हो[illegible]तरकालिकत्वे[illegible]स इदानीं विरो
धाभावेन न तत्संगतिः। अदसो मादित्यत्र भाष्ये परैवत्यस्यान्तस्य युक्तमप्रकृतिभाव इत्येवार्थ आशयानभिज्ञस्या
ग्रेपश्नः। कथं कार्यकालमित्यादौ सेकदेश्युक्तरमेवं च न तद्विरोधः। तत्राभिस्वगृहेवाक्यार्थबोधः पूर्वम्।

अत एव भाष्ये संज्ञापरिभाषयोरविशेषेणैकदेशस्थत्वमुक्तं। कश्चित्परिभाषारूपइति कैयटोक्तं न
युक्तं। परार्थत्वेन परिभाषाणामिव संज्ञानामपि तुल्यत्वात्। अत एव सर्वशास्त्राणां प्रयोगार्थत्वेन प्रयोगरूप
एकदेशस्थत्वेपि परत्वादिकं संगच्छते। क्ङितिचेति सूत्रस्थकैयटोक्तरीत्या विधिसूत्राणां परिभाषादे
शसन्निधानेपि परत्वादिकं संगच्छते। एवं चाकडारसूत्रस्थभपदादिसंज्ञास्वेच्छो व्यवहार एव। अ
त एव ष्यङ इति सूत्रस्थभाष्यसंगतिः। अंशांतरप्रामाण्येन तस्यैकदेशयुक्तित्वेपि सर्वांशस्य एकदेशयुक्ति
त्वप्रमाणाभावात्। अत एवोद्योतपरिभाषेंदुशेखरादिभिर्न विरोधः। अन्यथा वाहऊठ्सूत्रस्थशेखरस्य
अदसोमादित्यत्रोद्योतस्यैकदेशविकृतमनन्यवदिति व्याख्यानस्य परिभाषेंदुशेखरस्य चासंगतिः स्पष्टै
व स्यात्। अत्र सग्रंथस्य सर्वस्य सिद्धांतितत्वेपि अंशांतरस्य सिद्धांतत्वमिति सूचयितुं केचिदित्या
हुरित्युक्तं। एवं च संज्ञापरिभाषाणामैकरूप्यमेव फलितं। एतावानेव विशेषः। ष्यङः सूत्रभाष्यादौ
त्सूत्रभाष्याच्च संज्ञाशास्त्राणां वा कैकवाक्यता। परिभाषाणां तु लाघवात्स्वदेकवाक्यतेति एतदेव ध्वन
यितुमाह। अलमिति। अत्र बंधपदार्थमाह। इत्संज्ञकादिति। अनेन पूर्वसंगतिः सूचिता। अन्ययोर्वि

[illegible] वलनपूर्वकत्वहूवर्णसंगतिः। इत्यत्र प्रत्ययुक्तलोपान्यभावाभावकार्यभाज इति तु परमा
र्थस्तेनोच्चारणार्थेषु नाभिप्रसंगः। विधेयकत्वाप्यदर्शनादिति। ननूपस्थाप्येऽनवयवत्वं साध्यते उत उप
स्थापके नाद्यः। हलन्त्यमित्यत्र लक्षणाया निर्बीजत्वापत्तेः। नान्त्योऽपि। विधेयकत्वाप्यदर्शनादिति हेतोरप्र
संगत्यापत्तेः। न हि शरीरावयवस्य हस्तादेर्हस्तादावदर्शनेनानवयवत्वं शक्यते वक्तुमिति चेन्न। प्राग्भ्यामा
दौ उपस्थापके हृष्टस्यान्यत्र स्वस्योपस्थाप्येऽपि दर्शनवन्मध्वनेनदभावेन तस्योपस्थापकानवयवत्वमित्याशयात्
। यद्यपि त्रयाणां वचनरूपाणामकरणेनानवयवत्वमेव युक्तं लाघवात्तथापि न हि वर्णाभिव्यक्तिजनकं कं
ठाद्यभिघातगौरवमेवादर्तव्यमिति न्यायेन तत्र चनभारोपरूपस्य ज्ञानं अन्यमनोव्यापारगौरवस्यापि सत्त्वे
न न्यायसिद्धावयवत्वस्यैव न्याय्यत्वाद्धूचनूत्रयावश्यकत्वस्य भाष्यतो लाभाच्चात आह। वस्त्विति। नन्वे
नम्मनेनानुबंधानामेकान्तत्वे पचतिभवतीत्यादौ तासनुदात्तेदिति स्वरानापत्तिः। अकारांशेनोपदिश्यमानत्वा
भावात्। भाष्ये स्वरविधौ नथैव सिद्धांतितत्वात्। अत एव हनो हथ इत्यादौ ऽनुदात्तत्वं। सुद्धाकारेणु वपरे
शिवद्भावो बोध्य इति चेन्न। नानुबंधकृतमनेजंतत्वमिति परिभाषया मनेजंतपदस्यानकारांतत्वस्याप्युप

शांकरी
३

लक्षणत्वात्। अन्यथानेकमुदाहरणमितिन्यायेन नासत्युदाने ङिःत्वादिष्वेव वृद्धेनिभावः। शिङ्ग्रहणं व्यर्थमि
ति। नन्वित्संज्ञालोपयोरन्तरंगत्वेनात्र प्रसक्त्यनुबंधविनिर्मुक्तपदार्थोपस्थिते [illegible] शादौ नानेकाल्त्वमिति चेन्न
।सूत्रोपात्तस्यैव स्थानित्वमिवादेशत्वमपि नस्यैवांगीकारादित्याशयात्। शिङ्ग्रहणेनात्र वन्धानामल्त्वव्यवहारा
भावोज्ञाप्यतेनेनेनेयं फलितेतिस्थानिवत्सूत्रे शेखरे। अत एव प्रदीव्यन्यादौ स्थानिवत्त्वात्कित्त्वात्कित्त्वान्निर्देशे
नगुणाभावः। एतेनानूर्वीचेयमित्यपास्तं। यदि तु नत्यपीति विशेषापरसंज्ञाप्रक्रमाश्रित्य प्रक्षीव्यत्यादिसिद्धिः।
सूत्रोपात्तस्यान्यादेशत्वमपि फलाभावान्नांगीक्रियते। ओशादावपि भून पूर्वेणानेकाल्त्वादेव सिद्धिः। शिशी
ङाणलादेरपि आनुपूर्व्यान सिद्धिः। अर्वणस्तृ इत्यादौ नुगिकार्यार्थत्वेनानेकाल्त्वाभावे दिन्न उदित्यत्र
नूच्चारणार्थत्वेन न दोषोऽन्यथासामर्थ्यादृप्रत्ययत्वेऽपि तिस्वरः स्यादिति ध्वनितं चेदमनेकाल्सूत्रे भाष्ये।
स्पष्टश्चायमर्थस्तत्रैव कौस्तुभे इत्युच्यते। नन्वेकान्तत्वादिनापि नांगीकर्तव्येषा। शिङ्ग्रहणं च न कर्तव्यं। एवं
चानेकाल्त्वात्सर्वादेशः श्यादेश इति प्रक्रियाग्रंथः परिभाषेन्दुशेखरस्वरसत उपपद्यते। लुटः प्रथमस्येति
सूत्रभाष्यं तु सूत्ररीत्यानिबाध्यं। किं चार्वणस्त्रित्यादौ ङकारानुबन्धकरणेऽपि निर्वाहोऽनङ्वत्। एतेन दिव

उदित्सत्र अनउदित्सत्र चनकारोच्चारणस्य भाव्यमानोण्युकारः सवर्णान्गृह्णातीत्यर्थज्ञापनतया आव-
श्यकत्वेन नकारांदुरुद्धरः ङकारकरणेनं नं स्येत्सं ज्ञापनेऽपि न स्यानामित्सपाहलं निकसुद्धुहरणमिति न्यायेन नत्सं-
योजनस्यैवाभावात्। अदसोसेरित्सत्र उ इ इति समाहारेणनिर्देशाच्च। असंदेहायनत्रैव ऊकालञ्‌ इति वदूदृ ति निर्दे-
शेन सर्वेष्टसिद्धेः। आपरिभाषास्त्रीकोरेसनाशंसङ्क्त्यादौ अनिग्रसंयोगदूदृ उपधायागोहृ इति सूत्रभाष्याच्च तस्यन्यत्रवि-
स्तरः। अवदानं मुखमिति। आत्वे कृते पलोपेन त्वानुमानिकस्याप्यादेशभावेनदाप् इत्यस्यदा इत्यादेशेस्यानिव
त्वेन दाप्त्वसुलभं तल्लोपकारलोपेनुदे पृङ्क्त्यस्य दादा इत्यस्यस्थानिव त्वेऽपि तत्रदात्वाभावादिति भावस्संदेवोप
पाद्यति। पलोपेन रमात्वे कृते इति। नच पलोपेन रमुपदेशत्वाभावात्कथमात्वमिति वाच्यं दोदद्घोरित्यत्र दइत्युपाद-
ध नेनानुबन्धलोपेन रमप्युपदेशत्वकल्पनात्। उदीचां माङः इति। माङ् मानेइ इति तु नेह गृह्यते ज्ञापकपर भाष्यप्रामा
ण्यात् पूर्वकालार्थकक्त्वाप्रत्ययस्तेनो नानभिधानात्। भाष्यनुदुपायानरभ[illegible]शने नास्याना वश्यकत्वंस्स-
चितं। नथाहि। नायं दैप् किंतु [illegible] दिष्टदाप् शोधने पक्वने। दायनीत्यत्र स्वरे भेदस्तु नोभययाप्यंतोदात्तत्वात्।
नाच्छीलिके चानशिदायमानहृत्सत्रापिनस्वरभेदः श्यन्स्वरस्याद्युदात्तस्यसतिशिष्टत्वे ऽन्यत्र विकरणेभ्यइ-

शांकरी· त्युक्तेर्नबलवत्त्वं। उभयथाप्ययं नोदात्तस्यैव सत्त्वात्। प्रणिदापयतीत्यत्रादाविति निप्रतिषेधाभावात्। यापि दिन्न्यासो भ
४ पि दर्शितो दाधाविति सूत्रभाष्ये॥ ...ग्रीचां मांङ इत्यत्र तु कृते नानुबंधलोपस्य मेङ आत्वे स्वोपलक्षितोच्चारणार्थो ङका
रइति नदाशयः। इदानि दध्यासोरिति। वासरूपसूत्रे भाष्ये तु उपायो न रूप[illegible]र्शनमपि। नत्र हि सूत्रे ऽसारूप्यमौ
पदेशिकं प्रायोगिकं चेति प्रश्ने। औपदेशिकग्रहणे सरूपप्रसंगे ये वाध्यवाधकभा[illegible]फलाभावेन सारूप्ये एवं न तत्त्वेन ना
सरूपग्रहणानर्थक्यात् प्रायोगिकमिह गृह्यते। न च प्रायोगिकग्रहणे ग्रामणीः ग्रामण्ये इत्यत्र क्विपो ऽदर्शनरूपत्वे
न सरूपस्यैवाभा[illegible]न क्विपणोः न स्यानामिति वाच्यं। असरूप इत्यस्यासरूपस्याभाव इत्यर्थे नादोषादित्युक्तमेवं च भ
नात्र पक्षे वचनकर्तव्यतां या आवश्यकत्वं मंस्त। एतेन नानुबं[illegible]कृतमसारूप्यमिति तु कर्तव्यमेव। कारणावी
कार्यवोधोत्तरं प्रत्ययत्वज्ञानं तदुत्तरमित्संज्ञेति वोध्यमित्य[illegible]क्तमिति मात्सर्यमुत्सार्य विचार्यमार्यैः। रिति दि
क्। नन्वध्येताशयितेति क्ङितिचेत्यत्र क्ङितो निनिमित्तसप्तमीति भावः। नन्निमित्तग्रहणं कर्तव्यमिति वार्तिकात्
भाष्यकृता क्रोः क्ङित्वेन नत्वं साध्यवार्तिकप्रत्याख्या[illegible]च्च यत एव भिन्नमित्यादौ न गुणः तद्भावभाविनामात्रेण
ह निमित्तत्वं। अत एव जैजैतुरित्यादिसिद्धिः। हित्वे तु सोऽनिमित्तत्वे ऽनाचोपि नत्वसत्त्वात्। यद्यपि शयितेत्यत्र इकार
चक्रत

स्वकार्यित्वेपि न शीङ् इति गुणनिषेधो दुर्वारस्तथाप्यर्थवत्त्वस्यान्यादेशभावइति सिद्धांतात्समुदायकार्यित्वलाभः
श्रीरिरिषतीत्यत्रेवावयवद्वारा समुदायेन सत्वाच्च। उर्णुनूषतीत्यत्रनुसन्नंतस्योद्देश्यत्वेपि न त्रैवावयवपि समुदाय
द्वारावयवस्य प्राप्तं कार्यित्ववारणाय कार्यमनुभवन्निति भाष्ये द्वित्वविधो हि सन्यङोरिति षष्ठी नतु सप्तमी। अन्यथा
प्रनोषिषतीत्यत्र सन्नो द्वित्वं न स्यादिति बोध्यं। यदि तु क्विनीत्यपि च सप्तमी कारकविभक्तेर्बलवत्त्वात्। क्रोः
कित्वेनैकवर्णाव्यवधानं सह्यमिति निमित्तमिति स्यादेन दोषः। द्विर्वचनेपि सत्रापि हि रुच्येनेऽसि न्ति निव्युत्सतारि
रिषतीत्यत्र न दोषस्तन्नहि नहीकारे परे द्विरुच्यते किंतु न स्येवउ अनुविषनीत्यत्रतु इकारे परे द्वित्वमुच्यते इति
भवस्येव स्थानिवत्त्वमिष्टमुच्यते न दोषानिष्फला। यद्येनदतिरिक्तफलं नेनीतीति परे "वस्तुन इति। नन्वेवं यवाद्ययविभो
स्संबंधस्य समवायत्वमित्यनुभवाद्धोके निमित्तकारणस्य दंडस्य समवायिकारणमृत्तिकायाश्च भेद इति श
क्यनेवक्तुं। शास्त्रेन थाश्रयणे मानाभावः। वर्णानां प्रसज्यप्रसंजककाभावसंबंधसत्त्वेपि अवयवावयवित्वस्या
लाभात्। न च शश्यिनेत्यत्र शीसेनत्वसमवेतगुणरूपकार्ये संपन्ने निमित्तकारणस्य डित्वस्य शेषत्वसत्त्वेन
तत्संभव इति वाच्यं। एवमप्यध्येत्यादौ तदसंभवादिति चेन्न। शंस्यिनरीति ज्ञापकमात्रसाध्यत्वेनादोषात्।

प्रकृतग्रंथस्तु प्राचामनुसारीति केचित्। ध्वनितं चैतत्। यद्यपि भाष्ये एतत्परिभाषाभावस्यैव ध्वननं। तथा हि जेघ्री
यते देध्मीयते इत्येतद्ग्रहणव्यावर्त्यं। तत्र च कार्यनिर्देशे तदर्थं क्वाद्रूपनिर्देशे ई घ्राध्मोरिति त्वस्य निह्न
त्वाऽनिष्टापत्तिरित्युक्तं। तत्र च नटभार्यो वद्व्यंजनानिभवंतीति भाष्यसिद्धांतात्। इतो याजवधिकस्य हि त्वय
झे निमित्तत्वात् नापत्त्यादोषाभावेन भाष्यासंगतिस्तथापि स्वरान्तरे व्यंजनानु[illegible]स्येति प्रातिशाख्यमनुसृत्यो
क्तं। अत्र पक्षे अरिरिषतीत्यत्र रिशब्दस्य हि त्वे ईकारस्य सनवयवतया हित्वानुभवेन तन्निमित्तत्वाभावान्न
दोष इति बोध्यं। एतेन कृतेऽप्यग्रहणेऽरिरिषतीत्यादौ गुणस्य स्थानिवत्त्वेन इस्शब्दस्य द्वित्ववारणेनैषा ध्वनिते
त्यपास्तं। सत्यसति च तस्मिंस्तत्र दोषस्य दुर्वारतया तस्याप्यग्रहणव्यावर्त्याभावादग्रहणस्यैव व्यावर्त्य
मिति प्रश्नेनारिरिषतीत्युत्तरस्यायोग्यत्वाच्च। इत्थं ग्रंथकृदाकूतं। [illegible]कार्यनिर्देशे चक्रतुरित्यादौ अनकारा
भ्यासनामाप्नोतीत्याशंक्याजग्रहणेन रूपातिदेशे ज्ञापितेनोक्तदोषवारणं कृतं। अग्रे अधिजगे इत्यत्र इव
र्णाभ्यासत्वमाप्नोतीति रूपातिदेशे दूषणमभिधाय [illegible] लिटीति द्विलकारको निर्देशः। लिटि लिलकारादौ वि
निरुक्तं। एवं चाजग्रहणस्यैतदेव व्यावर्त्यमित्याशयः। एवं चाधिजगे इतिवदरिरिषतीत्यत्रैव दोषानुप

न्यासेन भगवता साध्वीतिनैवेति सुधियो विभावयंतु। अ[illegible]र्थं धातुकी याः सामान्येन भवंतीति पक्षे तद्[illegible]व भादि[illegible]
[illegible]र्णैव तद् वृद्धिभाविता मात्रेणापि निमित्तत्वमित्यं[illegible]रात्। अधिजगे इत्यस्य स्थानद्वाव त्सिंबो[illegible]ई इत्य[illegible]ति मि
तत्वाश्रयणे लिंगत्वजग्रहणमेवेत्यन्यत्र विस्तरः। ननु पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन [illegible] सिद्धांता
द् यथोद्देशपक्षे शब्दप्रवृत्ता या घुसंज्ञाया अवारणापणत्वस्युल[illegible]य कार्यकालपक्षे दोष एवेत्यत आह अत्र
पक्षे अदसो मादिति[illegible]नाष्यप्रामाण्येन संज्ञाशास्त्रस्य स्वदेशे[illegible] वाक्यार्थाभावेन घुसंज्ञा या ण त्वं श[illegible]कथा क
त्वेन त्रिपादीस्थनयासिद्धत्वासाधनकार्ये कृते दारूपाभावादिति वाच्यं। अदसो मादित्यत्रोक्तरीत्या परिभाषा
त्वसंज्ञाशास्त्रस्यापि स्वदेशे वाक्यार्थस्य सत्त्वेनाष्टाध्यायीपाठकृतपरत्वाद्याश्रयणेन चानवगत्या हुसंज्ञाया
कृता यां साधनकार्ये कृते पि अत्र पक्षे णत्वं दुर्वारमिति चेन्न। पूर्वं धातुरुप[illegible]र्गेण उपसर्गार्थेन युज्यते ननः
साधनेन कारकेण कार्येण क्रियायाः साध्यत्वेन साधनाकांक्षत्वादित्यर्थस्य [illegible] कृदभिलषित[illegible]नं पूर्वं सा
धनकार्ये कृते दाप् इत्यस्य दारूप[illegible]त्वाभावादन्वयवस्थानर्थक्येन च णत्वविधौ यत्क्रिया युक्ताः प्रादयस्तं प्र
त्येव गत्युपसर्गे त्वमित्यर्थस्य सत्त्वेन दानिरूपितोपसर्गत्वाभावेन च णत्वदुर्न शंकायोगरूपमन् पक्षपात चूर्णितत्वा

री·

तंनचैवमपिकार्यकालपक्षेप्रोक्तोद्योनरीत्यांनरंगायांघुसंज्ञायांकर्तव्यायांबहिरंगस्यप्रकृतेऽसिद्धत्वाद्दाप्नीकृत्स्नं
दैर्घ्येप्लुते कृतेऽनुनासिकप्रतिबंधक[illegible]गृह्यत्व वद्दापशब्देदाबुध्याप्रवृत्तयाघुसंज्ञयाणत्वस्यलभमेवनिवाच्यं
।घेड्इतिसूत्रभाष्यप्रामाण्येनसंज्ञायावाक्यैकवाक्यत्वलाभेपिशतानीसत्रस्यश[illegible]त्तिनाकरीत्यापदसंज्ञासूत्रस्य
शेखरोक्तरीत्याकृन्मेजंतइतिसूत्रस्यशेखरोक्तरीत्याचविधिनिमित्तनिमित्तकत्व[illegible]स्यसंज्ञाशास्त्रस्यलाभेनउपसः
र्गनिमित्तकत्वेनघुसंज्ञायामपिबहिरंगत्वस्यतुल्यत्वात्।अप्रधानेप्रधाननिमित्तकत्वस्यलोकसिद्धत्वेपिप्र
धानस्यतन्निमित्तक[illegible]मानाभावेनपरस्परंबहिरंगत्वखंडकग्रंथेननविरोधः।असिद्धपरिभाषाज्ञापकंपूर्वभा
ष्यादिनायथानविरोधस्तथानत्रैवस्फुटीकरिष्यति।एवंच[illegible]सर्वथानंदसिद्धिरेवानच्याहाण्णुप्रणि
दापयतीति।अत्रादाविनिप्रतिषेधस्तुनतेनहिवानस्यप्रति[illegible]पिपानस्यप्रतिषेधात्।सूत्रेऽदाविनिच
लैननिर्देशइतिदाधाघ्विति सूत्रेभाष्यस्पष्टं।लोकतस्तद्दृष्टीलाभेपिनदनित्यत्वेनैवतल्लाभोनत्यांहे।यत्तुदे
[illegible]ति॥अन्यथारेफस्यारत्वेनिशास्त्रेणाकारावयव[illegible]घेनेनावयवस्यसमुदायावयवत्व[illegible]लोकसि एम
द्धत्वेनदावयवत्वस्यरेफसत्वेनप्रतिदारयतीत्यादौ[illegible]षःस्यादितिभावः।नचायंन्यायःशास्त्रेनाश्रीयत ६

र्निवाच्यं। हलं तानेन्नादेः परस्या एकत्वस्य हलो लोपः ...र्थे केहलङ्यादिसूत्रस्य सोमसुन् इत्यादौ अनिष्टाप
त्तेः। कीर्गीरित्यादौ रेफस्यापदांतत्वेन विसर्गानापत्तेश्च। सज्जूः भूरित्यत्र नकारस्य तु कापदांतत्वान्न क्षतिः
टीसनापत्तेश्च। अत एव दीधीवेवीटामिति सूत्रे इट्ग्रहणं चरितार्थं। अन्यथा इकारस्य शास्त्रे ए...यात्रेय व
त्वबोधने पि अग्रा...यवत्वाबोधनेन गुणाप्रवृत्तौ न हैयर्थ्यं ...मेव। एतेन पठितेत्यादौ एवं सनि इडिन्वा प
त्तिरित्यपास्तं। अनुबंधविनिर्मुक्तपदार्थोपस्थितिरिति सिद्धांतादेकानत्वं पक्षे ष्यु पदेश एव संज्ञा लोपा
भ्यामपहाराइकारस्य कस्याप्यवयवत्वाभावेन टित्सद्भावाच्यत्वाभावात्। यत्र संज्ञानुबंधानां तत्र प्रयो
जनाभावात्सामर्थ्यादुपस्थाप्येन तत्कार्यानुमानेपि अन्यत्रापि तदनुमाने मानाभावाच्च। भविनेत्यादौ लिंको
रस्य प्रत्ययावयवत्वे बोधिते न्यायेन समुदायावयवत्वं सुलभमिति बोध्यं। ...पदेशप्रयुक्ते संज्ञा संव्यवह्रियन
इत्यादिना स्त्रीलिंगप्रकरणे शब्दे ...लिसाष्ट। एतेन त्युत्युलो ष्टित्करणेन कचिंदनाश्रयणमिति वदंतोपि परा
स्ताइत्सलं। मुग्विधानसामर्थ्यात् ...निनं तु सवर्णदीर्घबाधित्वात् नोडिन इतिस्यात्। मुग्विधाने नं तेक्रे कोडिन्य
न्यायेन सोपि बाध्यते। न च कृते पि मुकि अनया सदुर्वारएवेति वाच्यं। सर्वथानिरवकाशत्वेन बाधेरमायामित्या

णांकरो
७

दैरोप्युनरुत्सर्गप्रवृत्तावपिनतक्रकौण्डिन्यन्यायेनबाधेनाप्रवृत्तेरंगीकारात्। अस्तिचप्रवृत्तेन्यायविषयता। इयादे
शेकृतेपि आनुमानिकस्थान्यादेशेनस्थानिवत्त्वेनमुक्प्रवृत्तेः सत्त्वात्। सवर्णदीर्घेनत्वैवंनदन्तरंगकोचारि
तार्थ्यात्। यत्तुमुकिकृतेनेयादेशेनइतिनिपरकरणादिनितन्नपचमानइत्यत्रानुप्रदेशप्रसक्तस्वरसाधकपरभा
ष्यप्रामाण्येनयदागमलब्धस्यतत्परत्वेनव्यावृत्तेः। अविशेषाद्धिशिष्टत्वातिदेशवत्भाक्तिकस्याप्यतिदेशा
च्चेतिचेन्न। तावन्मात्रस्यप्रयोजनत्वे आनोडितइत्यनेनरंनानस्येत्येववदेत्। अर्धमात्रालाघवस्यउत्तरत्र ईद्दास
इत्यादौ व्यत्ययकरणेनानावश्यकत्वस्यचसत्त्वात्। नन्वेवमपिमुग्विधानंसफलं। पचमं आन्तरतम्यवस्था
यासानुनासिकनिरनुनासिकयोःस्थानेजायमानस्याकारस्यान्तरतम्यादुभयगुणकस्यप्राप्तत्संभवा
भावेपिपूर्वपरयोःप्रत्येकंस्थानित्वापर्यायतास्यात्। अन्यथातुस्थानिगुणकनिरनुनासिकएवस्यात्
।नचामइत्यत्रास्वातिदेशवत्कंठ्यत्वातिदेशस्यसत्त्वेपि ओदौतोः कंठ्यत्व ओष्ठ्यत्वयोरेकत्रदर्शने
तानिदिश्यमानधर्मविरुद्धधर्मस्याभावेनमकारस्यापिस्यौष्ठ्यत्वस्यापिसत्त्वेनोभयान्तरतम्येनउणावत्
त्सवर्णदीर्घेणोभयगुणकयोरोकारौकारयोरेवस्यात्। पचौनः पचानः पचौनः पचौनइतिरूपस्यते

राम
७

त्वान्नाकारः प्राप्त इति वाच्यं। नह्याविस्तुपलक्षणमेतत् सर्वस्यानुनासिकस्यादर्शनादिति शेखरोक्तरीत्या
नुनासिकत्वाभावात्। भंजो आमर्दने इत्यादौ तथादर्शनेपि स्वराणां सूक्ष्मणां चैव विवृतं करणं स्मृतं इति
शिक्षोक्तेरोकारस्य विवृततमत्वप्रतीत्या तस्य च विवृतेनाकारेण साम्याभावेपि ईषत्सादृश्यस्य विवृतत्वेनाकारे
कारस्य प्राप्तावपि एतावता गुणविधानसाफल्यं केनचिद्यत्नेनेति चेन्न। विधानस्यैतावत्प्रयोजनत्वे मा
त्रालाघवेन प्रक्रियालाघवेन च आनस्यैव इति न्यासमेव पाणिनिः कुर्यात्। नाशिश्रियत। एवं चात्र परस्ये
त्व   नेनाकारस्य सानुनासिके उकारे कृते आद्गुण इत्यनेन सानुनासिकानन्तरतम्यात्सानुनासिको
गुणः। निरनुनासिकानन्तरतम्यात्तादृश एवेति पचोनः पचौन इति त्वदभीष्टसिद्धमेवेति किमियता प्रयासे
नेति रहसि विचार्यतां। एतेन एचइगिति सूत्रभाष्यप्रदर्शितभूयसा व्यपदेशप्रवृत्तेकं ध्वस्तमिति। नो वा
ह्रस्वेन सवर्ण आकार एव भविष्यतीति नोकारादय इत्यपास्तं। एचोनन्तरतमह्रस्वाभावेनावयवान्तरतमेन न
व्यवस्थापनेनियमप्रसक्त्या उत्तरभागबाहुल्येन व्यवस्थायास्तत्वेपि संभवति समुदायानन्तरतम्येन दाश्रयणे
मानाभावादनिष्टापत्तेश्च। अतएव खट्वा एडका इत्यादौ अवर्णभागबाहुल्येपि नाकारो वृद्धिरिति ध्वनि

नश्चायमर्थः। नुड्वर्णयोरादेशे वर्णप्रतिपत्तिरित्यादिना स्थानेऽन्तरतमसूत्रशेषभाष्ये कैयटेन स्पष्टमेवोक्तमि
ांकरी तिदिक्। दिदीयेइतिसुड्विधानवैयर्थ्यं नुनलोपस्य पाक्षिकत्वेन तस्य यत्र यश्रवणार्थत्वात्। ननु नायं दोषः
८ वुग्युटाविति वार्त्तिकारंभात्। एतस्मिन्काचइत्येतदप्राप्तियोग्ययुटोऽचारितार्थ्यात्। घञर्थे कविधानमिति के
नेकाच्त्वाभावेपि इयङः प्राप्तिसत्त्वादित्यरुचेराह। जहातेसादाविति। आदिना भूयास्वामित्यादौ आर्धधा
तुकत्वबलादित्यत्र निर्देशेन प्राप्तस्येटः परिग्रहः ओणाम्भूणामित्यादौ नुड्विशिष्टस्याजादित्वानिर्देश
नओः सुधीनि प्राप्तयणादेशस्य च प्रसंगो बाध्यः। ननु यमुद्दिश्य विहित इत्युक्तेऽपि धिषीष्टेत्यादौ सुटः सत्वं सम्प्रस्य
यावयवत्वाभावेन प्रसक्तं स्यात्। नकारोद्देशेन सुटो विधानात्। न च तकारे प्रत्ययावयवत्वस्य त्वेनकारोद्देशेन
षत्वसुलभमिति वाच्यं। उद्देश्यतावच्छेदकधर्मसमानाधिकरणधर्मस्य प्रत्ययावयवत्वस्य विशिष्टनिर्दे
शेपि सकारे तदभावादिति चेन्न। तन्मध्यपतितन्यायेन सो सुड्विशिष्टस्य प्रत्ययावयवत्वालाभे सकारे तद
वयवत्वाक्षतेः ॥ क्वचिद्धि धातुद्देश्यविशेषणेनापि आगमविशिष्टा गृह्यन्ते। अत एव बहुवचनस्याव राम
त्रसावित्यत्र पदस्य पदादित्यधिकारादुपस्थितसमर्थपरिभाषाबाधाय पदत्वेन सुबन्तत्वेन त्वायत्रस्या ८

स्यादुद्देश्यतानवैवास्याः प्रवृत्तिरित्युक्तं समर्थसूत्रे शेखरे। विशेषणे उद्देश्यत्वाभावे तु मास्मादित्य[illegible]केऽसंगता
स्यान्। तेन शेरते इत्यादौ रुड्विशिष्टस्य सार्वधातुकत्वात् शीङः सार्वधातुके गुण इति गुणः सिध्यति। वर्णग्रहणे
इति। न हि निधर्मितनिर्देशेन तद्घटितधर्मनिर्देशे चेत्सत्यः। अत एव हु झलभ्य इति सूत्रे भाष्ये रुदिहो सादौ [illegible]
व्याख्यानये हलीत्यनुवर्त्य हलादेरीरिति व्याख्यानं। अन्यथानया हलादित्वानिर्देशेन तदसंगतिः स्पष्टैव। अन
एवभूयास्तामित्यादौ वलादित्वाभावेन नेडिति तेन दिदीये इत्यादौ हरीणां इत्यादौ सुटि नुटि च यणादयोनेनि बो
ध्यं नन्वपरनिमित्तत्वेनांतरंगत्वात्स्वरसिद्धिर्भवत्येव न च वारणं परिभाषया प्रथमतो मुक्ताभाव्यमित्यवाच्यम्।
तस्याः बहिरंगपरिभाषानित्यत्वमूलकत्वेन यत्रानित्यत्वमिति न तथैव नात्सीकारादित्यत्र चैषा हार्कि[illegible]तैति। ङ
मंत इति। फलितार्थपरमिदं।।। सूत्रार्थस्तु ह्रस्वात्परस्य पदान्तस्य यवस्य ङमोङमुट् जादौ पदे इति बोध्यः। तेना
वृत्तिकरणे गौरवेणास्य भाष्यस्यैकदेशयुक्तित्वमिति परास्तं। पूर्वानत्वकथनेनैकदेशयुक्तित्वमित्यन्यत्। य
त्तु मिरच्चोत्यादिनि सूत्रस्य भाष्यविरोधेनैकदेशयुक्तित्वमस्येति। अत्र हि भिनः परादित्वे हि षांतप इति अ
त्र मोनुस्वारो न स्यात् पदांतत्वादित्युक्तं। आगमानामागमिधर्म्यत्वे शिष्टबोधने हि तदसंगतिरिति तन्नयुक्ति

शंकरी॰
९

मन्।संयोगांतलोपेकृतेऽनुस्वारस्यसुकरत्वेननस्यैकदेशयुक्तित्वसत्त्वयाऽभिवाच्यत्वात्।नन्वेवंकुतःसोर्थउपे
क्षितइतिचेल्लोकानुभवविरोधात्।फलाभावाद्द्रोणामित्यादौनुटःसुत्वेननांतस्यपदत्वेनपदांतस्येतिण
त्वनिषेधप्रसंगात्दोषबाहुल्याच्चेतिगृहाण।सिद्धांतासंगतिरिति।नन्वेवमपिभाष्यासंगतिः।पाघ्रेतिसूत्रेपा
इतिविशिष्टरूपोपादानसत्त्वेनोपस्थितार्थस्यशब्दंप्रतिविशेषणतयान्वयसंभवेनार्थवतःपाशब्दस्यादे
शविधानेनागमसमभिव्याहारेविशिष्टस्यैवार्थवत्त्वेनचनिर्दिश्यमानपारूपस्यार्थवत्त्वाभावादितिचेन्न।
आदेशविधौअंगाधिकारसत्त्वेनार्थवत्पाशब्दांतंयदंगंतदवयवस्यनिर्दिश्यमानस्यादेशइत्यर्थसत्त्वे
नयदागमेतिन्यायेनप्रकृतेर्थवत्पाशब्दःअपाइतितदंतत्वमपिव्यपदेशिवद्भावेननस्यैवसत्त्वेनतदवयव
पाशब्देनिर्दिश्यमानत्वस्यसत्त्वेतिरितिभाष्याशयइतिबोध्यं।स्थानषष्ठीनिर्देशादिति।एवंचशब्दानित्यत्ववार
णायपठितवाक्यस्यलक्षणयासमुदायादेशपरत्वेपिनशक्यार्थत्यागइत्यतःपरस्मिन्नित्यादेर्नसंगति
रितिबोध्यं।ननुस्थानिवत्त्वेनानुमानिकस्यानमादेशग्रहणमित्युक्तं।नत्वकथमिहोच्यतेनस्यस्थानेव
सूत्रेग्रहणेननदोषइत्यादेशग्रहणसामर्थ्यादितिचेत्सप्रकृतेपीतिचेन्न।हनोवधेतिवदेरुग्रितिषष्ठी।कि

दैंशेनाष्टाध्यायीबोधितस्यान्यादेशभावसत्त्वेपि श्रोतस्यान्यादेशभावे शब्दानांनित्यत्वानुपपत्याकल्प्य
मानसमुदायादेशस्यादेशग्रहणेनग्रहणेपिनेदृशानामितिनिबोध्यंनन्वेवमुदस्थादित्यादावितिबेदागमेऽतिव्या
येनोद्देश्यतावच्छेदकसमानाधिकरणयावद्धर्माअतिदिश्यंते।तेनात्वस्यात्त्वमुपपन्नं अत्रचेदं भाष्यमीनमिति
बोध्यं।अतिस्यइत्यादिभाष्यादाहरणादध्याहृतनिर्दिश्यमानपदेलक्षणयाअर्थद्वयमित्याह। अवयवरूपमेवे
ति।यद्यप्यतिस्यइत्यत्रास्याबाधेऽत्यसदेशस्येत्येवसिद्धं।नत्वेतराव्यवधानंचज्ञापकस्यसजातीयविषयत्वाद
जैव्यवधानं।अतएवहंसशिरांसीत्यादौनदोषस्तथापिअतिसृपमित्यादौ अश्वो घोविद्वीत्यादौचरोहितीयार्थस्यफ
लंबोध्यं।निरूपितत्वस्यतृतीयार्थत्वादाह।स्थानिनिरूपितेइति।सचनिवर्त्यनिवर्तकभावोयथेकोयणीत्यादौन
त्वचेकोनिवर्तकोयणभवतिप्रसंगेसतीत्यर्थः।सचार्थानत्वैक्येनिबोध्यंजातिपक्षेदोषाभावादितिचेन्न।अस्यायं
भावः।निर्दिश्यमानत्वंनोच्चार्यमाणसजातीयत्वंवक्ष्यमाणाहयवरट्सूत्रभाष्यविरोधात्।नाप्युच्चार्यमाणपदबो
ध्यत्वंनत्वंउच्चार्यमाणस्यस्थापाबोध्यत्वस्यागमविशिष्टेसत्वेनउदस्थादपिबर्हित्याद्युदाहरणपरभाष्यविरोधात्।
येनविधिरितिशास्त्रप्रामाण्येनविशेषणस्यतदंतबोधकत्वेनोच्चार्यमाणविसर्जनीयपदबोध्यत्वस्यतदंतेसत्त्वेनो
॥उदिपर्णांनत्रहिविसर्जनीयांतस्यपदस्यसत्त्वमित्यर्थनिर्दिश्यमानपरिभाषयाविसर्गस्येवस्थानेसत्त्वमित्युक्तम्।कथमुच्चार्यमाणत्विसर्जे

कभाष्यविरोधापत्तेश्चानस्मादेतच्छास्त्रीयसंकेतेनग्राहकासहकारिणोच्चार्यमाणपदबोध्यत्वंतदितिवाच्यं।अस्ति
चउहस्मादपिबदित्यत्राद्यंनोटकिनाविनिशास्त्वसहकारः मुयदइत्यत्रयेनविधिरितिसहकारस्य।विसर्जनी
यस्यसइत्यत्रनुनदंतस्ययेनविधिरित्यनेनसहकारत्वेपिविंदुद्वयस्यतदभावात्।यद्यपित्वंरूपमितिसंकेतेन
ग्राहकसत्वेनैतच्छास्त्रीयत्वमनुपपन्नंतथापिभाष्येनसप्रत्याख्यानानात्।सत्वेपिनदतिरिक्तविशेषणेदोषाभावा
त्वईदृशनिर्दिश्यमानत्वंग्रंथकृतोप्यभिमतमेव।अन्यथाव्यक्तिपक्षेशंकायाजातिपक्षेणसमाधानासंगतिः।न
त्रजातेर्निर्दिश्यमानत्वेतुल्ययुक्त्याप्यणुदित्सूत्रगृहीताष्टादशव्यक्तीनांनिर्दिश्यमानत्वसंभवात्।ज्ञापकाश्रय
णासंगतिश्च।अतएवरीङृरिङोर्ङित्वंसप्रयोजनमितिवक्ष्यमाणग्रंथसंगतिः।अन्यथातेःसःसावित्यत्रानुवृ
त्तत्यदादीनामित्यस्यैवनहिद्विधाप्यनुवृत्तांगस्येत्यस्यनिर्दिश्यमानत्वसंभवादत्यादेशत्वायत्तस्यावश्यकत्वेनतद
संगतिः।ममतु अंगस्येत्यस्य नच्छास्त्रीयसंकेतितत्वेनुनदंतस्यचतथात्वेननसंगतिरस्यैवानन्वेत्वमपि।
स्वपूर्वापरविरोधः।इयङुवङोर्ङित्ववज्झलादीनामपिनिर्दिष्टत्वादत्यादेशत्वायेत्यनेनधातोरप्यनेनच्छा।
स्त्रसंकेतवत्त्वादितिचेत्न।ग्रंथस्यान्याभिप्रायकत्वात्।तथाहि।धातोरादिः धात्वादिः धातुरादिर्यस्येतिसतंद्वुए

त्को ष्टुरिति चेन्न। मन्वेवमपीति। अर्थवद्ग्रहणपरिभाषया सर्वथानर्थकस्य वारणेपीत्यर्थः॥ आन्महान्महान्भूतः
महद्भूतः च्व्यन्तस्योर्यादिच्विडाचश्चेत्यनेन गतित्वे कुगतिप्रादय इति समासः गौणार्थबोधकत्वेन शब्दस्यापि
त्वं बोध्यम्। संज्ञादिरिति। अत्र कर्मण्यातश्चोपसर्गे इत्यङ् आदिना अनुकरणपरिसंग्रहः। यद्वा संज्ञा आदिः प्र
थमबोधको यस्य स संज्ञादिरित्यर्थः। अत्र पक्षेऽप्यनुकरणसमुच्चायको बोध्यः। महान्तौ बाहू यस्य स महाबाहुरित्य
त्रात्वायोपसर्जनत्वरूपगौणत्वस्याग्रहणमावश्यकम्। अत एव समानाधिकरणोत्तरपदे आत्वविधानं सफलमु
पसर्जनप्रतिषेधश्च। एवं चेदं प्रयोजनं नास्ती धारणं पदकार्यविषयत्वस्येति हृदि निधायाह। किं चेति। यत्तु पदो
द्देश्यकं कार्यमेव न तत्कार्यमिति तन्न। आन्महत इत्यत्रोत्तरपदाधिकारेणैतेन पूर्वपदाक्षेपेण यथा कथंचि
त्तत्वसत्त्वेऽपि राजश्वशुराद्यदित्यादिना तद्धितविधौ सुबन्तानां तद्धित इत्यस्य सत्त्वेऽपि स्वमेन घकालतनेष्विति ज्ञापका
दुत्पद्यमानः प्रातिपदिकात्स्य यः स्वपः परस्तात्। एवं च गर्गादिभ्य इत्यादौ न लक्षणोऽत्यर्थस्त्वेन तद्धितानां पदोद्दे
श्यकत्वाभावेन स्वाशुरिरित्यादौ यदापत्तेः। गोभवदित्यादौ प्रगृह्यत्वापत्तेश्च। नापि पदसंबन्धित्वं तत्त्वं स्वाशुरिरित्या
दावनइओनापत्तेः। त्वद्भवतीत्यत्र त्वाद्यादेशानापत्तेश्च। तस्मादस्तु नः पदव्यपदेशरहितं निमित्तत्वं तत्त्वं तद्धितविधौ

शांकरी
१२

प्रातिपदिकाधिकारस्य सत्वेऽपि वस्तुनः पदव्यपदेशरहितनिमित्तकत्वसत्वात्। नचैवं प्रत्ययोत्तरपदयोश्चेत्यस्या
पि पदकार्यत्वापत्तिः। तथा च त्वद्भवतीत्यत्र त्वदाद्यादेशो न स्यादिति वाच्यं। उत्तरपदे पदव्यपदेशनिमित्तकत्वेऽपि त्वि
प्रत्ययादौ वस्तुनः पदव्यपदेशरहितनिमित्तकत्वाभावात्। अत एव न मद्योपध्वानं। त्वद्भवतीत्यादौ त्वि प्रत्यये
त्वादिष्वपि पदत्वसत्वेऽपि सुबंतत्वाभावात्। सुप्तिङंतमिह पदत्वं विवक्षितं। नत्वपदस्याप्रयोगे गौरित्यादिना ग्रंथकृ
तैव ध्वनितं। यदि तु राजश्वशुराद्यदित्यादौ उपजनिष्यमाणनिमित्तोऽप्यपवाद इति न्यायेन प्रकल्प्येति न्यायेन च भ
विषयत्वेन पदत्वबाध इत्युच्यते तदा पदव्यपदेश इति त्यक्त्वा सुबंतव्यपदेश इति [illegible] बोध्यः। उपात्तमित्या
दीनि। एतेन विशेषणत्रयस्यापीदमेवं कृत्यमिति ध्वनितं। तथाहि। यदुपात्तमत इति मतदिशिष्टरूपं यद्वि
शिष्टरूपं प्रातिपदिकादि न तद्विशिष्यार्थोपस्थापकं यद्विशिष्टार्थोपस्थापकं श्वश्रुर इति न तदुपात्तमिति ध्व
नितं। नन्वेवमोत्सूत्रस्य भाष्यासंगतिः। तत्र ह्यदो भवद्व्रौ भवदित्यादौ प्रगृह्यत्वं गौणत्वेन परिहृतं। निपातपदस्य प्रा
तिपदिकतुल्यत्वादत आह निपातं पदं त्विति। निपतंत्याख्यातार्थं प्रति विशेषणीभवंतीति व्युत्पत्त्या निपातप
दस्य चादिषु योगरूढत्वमिति भावः। प्रातिपदिकपदं तु शुद्धरूढमिति वैषम्यं बोध्यं। वस्तुनस्त्वत्रानुगतव्यक्ति

कानांसंज्ञानांव्यक्तिरेवप्रवृत्तिनिमित्तं।डित्थादिषुव्यक्तिरेवत्वप्रत्ययार्थइतिनडित्थत्वडित्थयोर्भेदः।बकादि
संज्ञानामपिव्यक्तिरेवतत्त्वत् अननुगतानांतासांनत्वछद्दएवएवंचनिपातसंज्ञायाअननुगतव्यक्तित्वेनव्यक्तिरेवप्रवृ
त्तिनिमित्तमितिचादित्वेनचादीनामुपस्थितिः।प्रातिपदिकशब्दस्यतुशब्दएवप्रवृत्तिनिमित्तमितिप्रातिपदिकपद
वत्वेनोपस्थितिरितियुक्तस्तयोर्वैषम्यं।ध्वनितंचेदंवैषम्यंकुत्वंकस्मान्नभवतिभक्त्वादित्यादिनाहरिहरिस्तैर्भाष्ये
स्पष्टंचेदंक्ल्लृकसूत्रेविवरणे।संज्ञाशब्दस्वरूपंवाप्रत्येयेस्त्वनत्वादिभिरित्युक्तिस्त्वननुगतविषयालक्षणयातथा
व्याख्यानपरकैयटस्तुचिंत्यएव।कुत्वंनेत्यस्यककारोनेत्यर्थस्तुप्रकृतानांभिप्रायेण।अत्रांतरतम्यात्सिद्धेवप्राप्तेः
एवंचणत्वंप्राप्तमित्यादावपिलक्षणांविनैवस्वरसतोनिर्वाहइत्यलं।ननुनायन्यायःपदकार्यविषयः।किंतुवि
शिष्टरूपोपादानविषयोऽन्यथागांवाहीकमानयेत्यादौत्वईकहेतोःसत्वेनात्वादिप्रवृत्तावपिगांपाठयेत्यादौपाठन
क्रियान्वयायविभक्त्युत्पत्तेःप्रागेवगौणत्वप्रतीत्याउक्तहेतोःसत्त्वाभावेनचात्वादेर्नस्यात्।अत्रतुविशिष्टरूपोपादाना
भावान्नदोषइतिकौस्तुभोक्तंयुक्तमित्याह।गांपाठयेत्यादावितिननुबोद्धृणांपदएवप्रतीतावपिवक्तृणांतुततःपू
र्वमेवप्रतीतिसत्वेनविनिगमनाविरहात्आह।भाष्यप्रयोगेत्वाद्यादेशकरणेनचेति।सांतेतिदीर्घआदिश

शांकरी ष्यार्थः॥ क्वचित्तथैव पाठः। तदनापत्तिरिति। अत्वं त्वं संपद्यते। अमहान्महान्भूत इत्येतेषु च्व्याद्यनापत्तिरित्यर्थः। त्वद्भवती
१५ सत्र तु पदसंस्कारपक्षेपि दोषो बोध्यः। एतत्सर्वं वक्तुस्तत्पूर्वमेवान्यथा बोध इत्यभिप्रेत्य वस्तुतः स्व एवनेत्याह। किं चेति॥ क
र्तृक्रिये चानिर्दिष्टाविति पाठः। पुमान्स्त्रियेत्येकशेषात्। अत एव भाष्येपि तथैव पाठः। गामेवेत्यस्य नस्य द्वाच्यमेवेत्यर्थः
।भाष्यस्यानुकरणमिदमन्यथा गौरेवेति वदेत्॥ एवं चाग्रे देवदत्तैवेति पाठः। भाष्ये संबुद्धांतस्यतस्य दर्शनात्। प्लुतत्वं
त्तु न वाक्यान्तत्वाभावात्। भाष्येपि गामभ्याजे देवदत्त शुक्लामिति पाठेन तस्य वाक्यान्तत्वाभावाच्चेति बोध्यं। श्लोक इति।
अभिव्यक्तपदार्था ये स्वतंत्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिष्विव्यर्थः। आरभतेति क्वाचित्कोप
पाठः आरभमाणेनेति पाठः। तस्यासत्वेन परित्वात्। नन्वेवमोत्त्वस्य भाष्यासंगतिरेवोक्तरीत्या न्यायस्य पदकार्यवि
षयत्वलाभेन तथैव वक्तव्येऽन्यथा समानाधिकरण मनुचितं प्रत्युत विशिष्टरूपोपादानविषयत्वमितो लभ्यत इ
त्याह। अर्थाश्रय इत्यादि। एवं च न्यायस्य पदकार्यविषयत्वं स्पष्टमेवोक्तमिति भावः। तत्रापि मदुक्तरीत्यैव इदं भाष्यं
व्याख्येयमित्याह। गोत इति। एवं च त्वदुक्तविशिष्टरूपोपादानसाधकमिदं नेति भावः। तस्यात्कृतव्यपदेशरहितो राम
निमित्तके कार्ये यत्र विशिष्यार्थोपस्थापकमुपात्तं विशिष्टरूपं तत्रैवायं न्यायः सिद्ध इति बोध्यं। नन्वेवमगोमतो गोमतो १४

संपन्नागोमतीभूताइतिप्रत्ययलोपसूत्रभाष्यप्रयोगेस्त्रियाः पुंवदित्यस्यापत्तिः। अमहतीमहतीसंपन्नाइत्यत्रेवतत्र
विशिष्टरूपोपादानाभावात्। एवं चास्य न्यायस्याप्रवृत्तिरिति चेन्न।। गोमतीत्यस्य नदीत्यर्थेनाभाषितपुंस्कत्वेनादो
षात्। स्पष्टं चेदं प्रत्ययलोप इत्यत्र विवरणे। यद्यपि तत्र कैयटेन च्व्यंते क्वचिद्विकृतेः कर्तृत्वं क्वचित्प्रकृतेरेवं च गोमती
संपन्ना इत्यत्र प्रकृतेः कर्तृत्वेन विकृतेः गोमतीत्यस्य भूतेत्यनेन वैयधिकरण्यान्न पुंवत्त्वं महद्भूत इत्यत्र तु विकृतेः क
र्तृत्वेनास्ति सामानाधिकरण्यमिति समाहितं तथापि गोमतीत्यस्यारोपेण अगोमतीत्यर्थकत्वेन सामानाधिकरण्य
स्य सत्त्वादिति विवरणे न दूषितत्वादिति दिक्। सुपथाः स्त्री श्रोता इत्यादाविति। अर्वाभ्यां तु ह्रस्वे त्वौणादिकोऽसिः। आगम
समभिव्याहारे विशिष्टस्यैवार्थवत्त्वनियमेनास्यैत्रानर्थकत्वमिति भावः। मतुनेदं युक्तं। अवयवानर्थक्येपि विशिष्ट
स्य तद्ग्रहणेन ग्रहणान्नानर्थकत्वं। न च निर्दिश्यमानेत्यस्यावयवषष्ठ्यामपि प्रवृत्त्या निर्दिश्यमानास्यं तस्योपधाया
दीर्घ इत्यर्थसत्त्वेन प्रकृते निर्दिश्यमानत्वस्य अनर्थकस्यैवेति वाच्यं। अपि वादित्यादावनर्थकेपि बाधादेशकरणे
न निर्दिश्यमानस्यार्थवतो ग्रहणे मानाभावात्। स्वमते उणादीनामव्युत्पन्नतया सुश्रोतसित्यव्युत्पन्नमेवेत्यभि
प्रायेण वक्तुं शक्यः। सुपथा इत्यस्यार्थवत्त्वस्योदाहरणस्य स्त्रीमेरुशृंगारूढत्वापत्तेरिति चेन्न। सुश्रोतसि स्वस्तनोति

ांकरी· प्रत्ययांतत्वेनादोषात्।भाष्येपीदमेवोदाहरणंद्रष्टव्यं।यद्यपिभाष्येदंडीवाग्मीसेवोपात्तंतथापितदुपलक्षण
१५ नयैवव्याख्येयं।अन्यथानत्रसोचेर्निर्दीर्घस्यसत्वेननियमस्यानुपयुक्तत्वेनचतद्संगतिःस्पष्टैवेतिदिक्।अंगादि
तिपरेइति॥परेइत्यनेनारुचिःसूचिता।नह्येजंतुविभाषेटइत्यत्रार्थवतएवबोध्यमःसंभवोनानर्थकस्यसंगादि
सस्यानर्थकत्वरूपंनत्रहीटइतिनबोध्यम्विशेषणमसंभवात्।इटोवयवत्वेनविशिष्टबोध्यत्वमस्त्वेपिनह्यहि
नत्वाभावेनतत्वस्यदुरुपपादत्वात्।किंतुधकारविशेषणं।येननाव्यवधानन्यायेनषीशब्दव्यवधानेपिभवतिवच
नसामर्थ्यात्।इणःपरोयइट्ततःपरस्येनत्संबंधिधकारस्यढोभवतीतितदर्थः।एवंचतत्राप्यर्थवतएवसंभवेनाग
ग्रहणस्योक्तार्थबोधकत्वंयुक्तमेव।परंतुअर्थवद्ग्रहणइत्यस्यतेनानित्यत्वबोधनेपिअनिनस्मन्नित्यस्यनन्मूल
कत्वंभाष्येवचनरूपेणैवतस्यपाठात्।स्पष्टश्चायमर्थः।विभाषेटइतिसूत्रेशेखरेइतितत्संबोध्यम्।अस्यानित्यत्वमू
लकत्वंवदतस्तवविभाषेटइत्यत्रानर्थकस्यैवतस्यसंभवेनात्रापितथाभ्रमःस्यादितिकर्तव्यंत्वयांगादितिम
मतुनावश्यकंतदितिग्रंथकृदाशयोबोध्यइत्यलं।तावन्मात्रांशेस्वरितत्वप्रतिज्ञाबललभ्यमिति।अनेनोभयत्रइद राम
मेवबीजमितिसूचितं।यद्यपिअर्थाधिकारशब्दाधिकारावेवानयोर्बीजमितिकैयटेनोक्तंतथापिपस्पानिरितिसू १५

त्रे भाष्ये कथं पुनरेकयोगनिर्दिष्टयोरेकदेशानुवर्तने एकदेशो नेत्युक्तं। एकसूत्रनिर्दिष्टानां पदानामप्युपदेशेऽ
जनुनासिक इत्यतोऽनुवृत्तिदर्शनेनार्थवदधातुरित्यतोऽर्थवत्पदानुवृत्तिदर्शनेन च यथाश्रुतभाष्यप्रश्नानुपपत्त्या समा
सनिर्दिष्टानामित्येवं न द्व्यर्थो वाच्यः ननु परस्परान्वितानामिति। समासे हि वृत्तिस्वभावाद्राजपुरुष इत्येन द्वट करा
जपुरुषपदयोरपि राजसंबंधवत्पुरुष इत्यर्थे शक्तिरिति निर्विवादो न एवं नामैकदेशेनासग्रहणमित्युक्तो दोषः। एवं च
पाकमूले इत्येन द्वटकमूलपदस्य पाकमूलार्थकस्यार्थरहितं तस्य कथमनुवृत्तिरर्थाधिकारादिति प्रश्नः। शब्दाधि
काराश्रयणेन समाधिः एकत्रार्थे एकोपस्थितिरूपे प्रयुज्यमानं संबंधं यत्पदं तेन निर्दिष्टानां पदानामध्ये एकदेशो
र्थरहितोऽप्यनुवर्तते। अनुमीयते शब्दाधिकाराश्रयणादित्युत्तरार्थः। समुदायाभिधायि द्वंद्वनिर्दिष्टयोरिति तु प्रकृ
ताभिप्रायेण पूर्वपक्षभाष्यव्याख्यानपरं बोध्यमिति लभ्यते। तथापि नेदं युक्तं। ओतो मृशंसोरिति सूत्रेऽचि नव
मित्यत्रात्त्वव्यावृत्तये वा सुप्यापिशलेरित्यतः सुपीत्यनुवर्त्य वानुवृत्तिमुक्तन्यायेनांशं कागुत्तरपदे इति द
ष्टांतेन वारणपरभाष्यासंगतेर्न हि दृष्टांतदार्ष्टांतिके वा समासनिर्देशोस्ति नियनतद् कि सामंजस्यं भवेत्। त
स्मान्न्यायद्वयस्य मदुक्तमेव प्रवृत्तौ निवृत्तौ च बीजं। सकसंबंधान्वितानां परस्परमिलितानामित्येवार्थः। अनए

...करी
१६

वालुग्रुन्नरपदेइत्यस्यावतरणेलेखः।अतएवपूर्वत्रलोकदृष्टांतोलेखश्चसंगच्छतेइतिऋतउद्इत्यत्रएवविंशांकुर्वे
नु।ज्यादादीयंसइति।ननुनेदंज्ञापकंज्ञापितेपिचारितार्थ्याभावात्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ईकार
स्याकारेवहालोपइत्यनेनलोपइत्यनुवर्त्त्यायीकारस्यनिवृत्तावकारविधानसामर्थ्याद्देवंपररूपंबाधित्वादीर्घोभ
विष्यतीतिचेन्न।अंगवृत्तपरिभाषायाःसिद्धांतेऽसत्वेनाकृतत्सार्वनिदीर्घव्यावृत्त्याकारस्यचारितार्थ्येनापवादत्वे
नदीर्घंबाधित्वापररूपापत्तेरित्याशयात्।दिवउदितीति।नन्वत्रचारितार्थ्याभावादज्ञापकमिदंअर्धमात्रिकव्यंज
नस्येषत्साहस्येनैकमात्रिकोकारेपिदीर्घस्याप्राप्तेः।नचव्रश्चेतिसूत्रेछग्रहणाकरणेलाघवेनच्छोरित्यत्रक्विङ्गी
त्यननुवृत्तौद्युभ्यामित्यादावूठिह्रस्वश्रवणार्थमित्यत्वात्सूत्रेदिवउत्वंतुनअंगत्वान्नस्येवप्राप्तेरितिवाच्यं।प्रतिपद
विधित्वेनशीघ्रोपस्थितत्वाद्दिवइत्येवस्यादितिचेन्न॥ऊठ्यपिवकारस्यनथात्वेनोभयोःसमत्वादित्याशयात्।पक्ष
द्वयसाधारणमपिनदस्तीत्याह।ऋतउदितीति।नचनपरत्वंढ्लोपइतिदीर्घबाधनार्थमितिवाच्यं।सुपर्वरा
जितावाणाज्वलितानाइवपन्नगाः।नैर्ऋतोरःस्वभासेनेसवितूरश्मयोयथेतिरामायणप्रयोगविरोधात्।उरण्रप राम
रइतिसूत्रेऽणग्रहणाभावेऊरपरइतिभाष्यविरोधाच्चेत्यस्पष्टंचेदंनत्रैवशेखरे।धर्मिग्राहकमानादादेशविषयइ १६

यंतेनसनाशंसतनादिकम्भ्यइत्यादौनदोषः।यद्यपिदीर्घस्यार्थस्याभिधानंनास्तिसिद्धानामेवशब्दानामन्वा
ख्यानमित्यणुदित्सूत्रभाष्यान्नदोषस्तथापिलक्ष्यैकचक्षुष्कानस्मान्प्रतिप्रवृत्तंशास्त्रमितिबोध्यं।नन्वेवमूदुपधा
यागोहइत्यत्रदीर्घनिर्देशोव्यर्थः।ऊदुपधायागोहइत्यनेनैवेष्टसिद्धिरितिचेन्न।दोषोणाविंत्यत्रेतदनुवृत्तौवांत
रतम्यादूषयतीत्यत्रहिमात्रसिद्धयेदोषेइतिविकृतनिर्देशस्यकर्तव्यतापत्तेस्तत्प्रत्याख्यानपरभाष्यासंगतेश्च।नच
दूषइत्युक्तावपिगुणेद्विमात्रसिद्धौउकर्तव्यमितिवाच्यं।तक्रकौण्डिन्यन्यायेनदूदुत्तरंचारितार्थ्येनउत्वेनगुणबाधाप
त्यादूषयतीत्यनिष्टापत्तेः।नचवैयर्थ्यंगुणबाधेनकृतार्थत्वात्।नचतावत्प्रयोजनत्वेनधातुलोपइत्यनेनतरंपाठेनैव
सिद्धाविहकरणंव्यर्थमेवेतिवाच्यं।लाघवाभावात्।पाठस्याशोकवनिकान्यायेनचरितार्थत्वाच्च।ममतुऊदित्य
नुवृत्तौस्थानेन्तरतमइत्यस्यप्राप्यमाणानामनंतरतमव्यावर्तकत्वेनाप्रवृत्तौवंदोषोनापिभाष्यासंगतिरितिबोध्यं
।एतेनउऊइतिह्रस्वदीर्घप्रश्लेषेणगोहइतिविकृतनिर्देशप्रत्याख्यानेनापिकर्तव्यमितिकेषांचिदुक्तिरप्यपास्ता।
ऊदुपधायागुहइत्युक्तौउक्तन्यायेनगुणबाधकत्वाभावेनगुहयतीत्यनिष्टापत्तेश्च।नचक्ङितिविषयेक्ङितिचेतिगुण
निषेधेनतत्रचारितार्थ्येनोक्तन्यायाप्रवृत्तौपरत्वाद्गुणइष्टसिद्धिरितिवाच्यं।निषेधेनापितस्याप्राप्तियोग्यमानपाया

ीकरी· न् । तेनापि नसैइ इत्यन्यत् । अतएवसंबुद्धौनलोपनिषेधेनरुत्वस्यचारितार्थ्येपि अपवादोरुर्नलोपंबाधिष्यतइतिभा
१७ ष्यासंगतिः । किंचानरसूत्रेपिनसत्यारव्यानस्यचिकीर्षितत्वेनंतदर्थंय त्नांतर स्यावश्यकतापत्तेः । प्रश्लेषेतुदीर्घ
स्वरितत्वबलादनुवृत्तिसामर्थ्याच्चेष्टसिद्धेः । यद्यपिह्रस्वोकारकरणेपिभाव्यमानोप्युकारस्सवर्णान्नगृह्णातीत्यने
नेष्टसिद्धिर्भविष्यति । ऊदुपधायाइत्यत्रविवरणेउक्तंतथापिनदुक्तयुक्त्याऽस्वरसग्रस्तमेनएवतत्सूत्रकमाहुरित्युक्त
मितिबोध्यं । स्वातंत्र्येणेनसत्यारव्यानप्रकारस्यप्रयोजनानामल्पत्वेनादसोसेरित्यत्रऊइतिदीर्घपाठइत्युक्तप्रायमिति
विशदंभाष्यतत्त्वविदां ॥ गृवेहिन्नमितिवाक्यइवसमासेपिकुतोअवादयोनेतिभावः । नलुमतेनेतिनिषेधस्तुनमत्सा
सत्यालुक्सप्रत्ययनिमित्तकांगसंज्ञोद्देश्यककार्यविधावेवनलुम्वृत्तेरंगीकारात् । स्थानिवत्सूत्रेणसिद्धेःऽत्विध्यर्थमिदमि
नि । अत्रणिडित्यादौआशीरित्यादौच ग्रहइम्शासइदंङ्हलोरितिचसिध्यति । सुहृषत्सासादइत्यत्रसोर्नेन ।-
सौअलोमोषसौइतिस्वरोऽत्वसंतस्येतिदीर्घश्चनभवति । अनसाहचर्यादतुनासाहचर्याच्चअसमासंतस्यैवोभ
यत्रग्रहणात् । नह्यत्रलक्षणमित्येवसिद्धेप्रत्ययलक्षणग्रहणंप्रत्ययनिमित्तकमेवेत्यर्थोपिद्रष्टव्यस्तेनप्रत्ययस्येन- राम
राविशेषणत्वेपिगोहिन्नमित्यादावबादिति । नचाव्युपश्लिष्टस्यैचोयवायावोभवंतीत्यर्थेनप्रत्ययस्येतरविशेष १३

णत्वमेवेति वाच्यं। एवं सति सर्वनामस्थाने चासंबुद्धौ ह्रस्वस्य गुणः त्रिचतुरोरित्यादिविधौ प्रत्ययलक्षणतापत्तावु
निष्टापत्तेः तस्मादित्यत्र विशेषणत्वमित्यस्य समानाधिकरणेन तद्विशेषणत्वमित्यर्थो व्याख्येयः॥ एवं च प्रकृते नत्व
मस्त्येवेत्याहुः। वस्तुतो वार्तिकमतेऽल्विध्यर्थमेव प्रत्ययलक्षणसूत्रारंभोऽन्यत्र तु स्थानिवत्त्वेनैवेष्टसिद्धेस्तत्रास्य
प्रवृत्तेः फलाभावात्। एवं च सर्वनामस्थाने इत्यादावस्याप्रवृत्तावपि सत्त्वभावेन समानाधिकरणेत्यादेरनुपयोगात्
। अन्यथा सुप्तिङन्तं सन्त्यङोः सर्वस्य सुपीत्यादावगत्या तदर्थं यत्नान्तरस्य कर्तव्यतापत्तेश्चेति दिक्। देवदत्तश्चिकी
र्षतीत्यादावित्ति। आदिना देवदत्तो गार्ग्य इत्यस्य परिग्रहः। सन्नन्तत्वादित्यादिना यङन्तत्वपरिग्रहः। धातुत्वादित्यादि
ना देवदत्तो गार्ग्य इत्यत्र प्राप्तप्रतिपादकत्वस्य संग्रहो बोध्यः। ननु विशेष्यासन्निधानात्कथं तेन न सिद्धेः सोत आ
ह। सचेति। ननु नित्यस इत्यनुत्तरपदग्रहणेन विशेष्यान्तरसत्त्वेपि तत्स्वीकारेणात एव वनोरचेत्यादौ नदेडिति निर्दे
शं च मत्वा तमिति चेत्। अयं भावः। विशेष्यान्तरासत्त्वे इत्यसावुपस्थितनदादौ स्यस्त्रीप्रत्यये चेति निषेधेनास्तित्वे इ
त्यर्थः। तेनातिराजकुमारिरित्यत्र द्विषयके गौरिति यावि निसूत्रेण नदादिनियमाभावेपि तदंतविधौ ह्रस्वसिद्धिः। तत्रो
पसर्जनस्येति तु न विशेषणं गोशब्देपि नदापत्तौ अतिगोः सुगौरित्यादौ ह्रस्वापत्तेः। यद्यपि नदादेरित्युपस्थितं विशेष्यमा

शांकरी दायनदंतविधिरन्यत्रतुशब्दस्वरूपमितिनियतं।वतु।तथापिनदादीत्यस्यार्थाधिकारानुरोधेनप्रत्ययविधानांवधिस्व
१८ पस्यग्रहणेनवनोरचेत्यादौनेनसामानाधिकरण्याभावान्शब्दस्वरूपविशेष्यमादायैवनदंतविधेरावश्यकत्वादि
त्याशयात्।अतएवहलङ्यादिसूत्रेशब्द...बहुश्रेयसीत्यादौलोपायङ्याबुभ्यामुपस्थितनदादीत्यनेन।...मनभ्य
पेत्यशब्दरूपंविशेष्यमादायनदंतनांसंसा...अस्तनिसीत्यैनदुपस्थितनदा...दीत्यनेनद्वलेनद्वितीयस्तुदंतविधिःसा
धितः।अतएवएङ्ह्रस्वादित्यत्रोक्तप्राचीनमपंचकृकशेखरादिःसंगच्छते।अन्यथाकुलेत्यादिसिद्धयेव्यधिकर
णान्वयस्यावश्यकत्वेनएकदेशविकृतन्यायेनकृतनरदित्यादौरेफांतेप्रकृतिनित्वसत्वेभावकारोनेनत्यादित्वस्यापि
लाभेनचहलोलोपापत्त्याप्राचोक्तरीतेरावश्यकत्वेननतदसंगतिः।अत्रचङ्ग्तरादिप्रतिषेधप्रत्याख्यानभाष्यम
पिमानं।यस्मिन्ग्राहकमानानासंनिभा...मपियत्स्यप्रागंभावित्वस्यनदादेर्ग्रहणान्नोक्तदोषइत्यन्ये।एतेनार्थवस
रिभाषयेष्टसिद्धिरितिनिरस्तं।विशिष्टरूपोपादानाभावात्।नचैवमपिसनाद्यंतनाधातवइत्यत्रोपस्थितनदादीत्य
स्यानन्वयादुक्तदोषतदवस्थएवेतिवाच्यं।क्वचिदुपस्थितनदादेर्लक्षणयानदिनस्यपरत्वेनादोषात्।अतएवसुस्त्रि राम
ई।नमित्यत्रापिदोषो।अन्यथापदसमुदायस्यपरत्वापत्तौवनिश्चापत्तेरितिगूढाकूतं।यत्रप्रत्ययोनिमित्तत्वेनाश्री १८

यत इति। केण: लुङ् लङ् लृङ् स्तुसनासीसुपिचरोस्तुपीत्यादौ। एवं च द्वेएते परिभाषे इति बोध्यं। यद्यपि प्रत्यय
